# गुरुकवचान्तरं

{॥ गुरुकवचान्तरं ॥}

॥ पुरश्चरणरसोल्लासे द्वितीयप्रश्ने दशमपटले गुरुकवचान्तरं ॥

ईश्वर उवाच ।

शृङ्ग देवि ! प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
लोकोपकारकं प्रश्नं न केनापि कृतं पुरा ॥ १॥

अद्यप्रभृति कस्यापि नाख्यातं कवचं मया ।
देशिका बहवः सन्ति मन्त्रसाधनतत्पराः ॥ २॥

न तेषां जायते सिद्धिर्मन्त्रैर्वा चक्रपूजनैः ।
गुरोर्विधानं कवचमज्ञात्वा क्रियते जपः ॥ ३॥

वृथा श्रमो भवेत्तस्य न सिद्धिर्मन्त्रपूजनैः ।
गुरुपादं पुरस्कृत्य प्राप्यते कवचं शुभम् ॥ ४॥

तदा मन्त्रस्य यन्त्रस्य सिद्धिर्भवति तत्क्षणात् ।
सुगोप्यन्तु प्रजप्तव्यं न वक्तव्यं वरानने ! ॥ ५॥

॥ विनियोगः ॥

ॐ नमोऽस्य श्रीगुरुकवचनाममन्त्रस्य परमब्रह्मर्षिः

सर्ववेदानुज्ञो देवदेव श्रीआदिशिवो देवता।

नमो हेसौं हंसः हसक्षमलवरयूं वीजं।

सोऽहं हंसः हसक्षमलवरयूं शक्तिः।

हंसः सोऽहं कीलकं।

श्रीसमस्तगुरुमण्डलप्रीत्यर्थे जपे विनियोगः।

॥ अथ ध्यानम् ॥

श्रीसिद्धमानवमुखा गुरवः स्वरूपं

संसारदाहशमनं द्विभुजं त्रिनेत्रम् ॥ १॥

वामाङ्गशक्तिसकलाभरणैर्विभूषं

ध्यायेज्जपेत् सकलसिद्धिफलप्रदै च ॥ २॥

॥ इति मनसा प्रणम्य ॥

॥ न्यासः ॥

हसां हृदयाय नमः। हसीं शिरसे स्वाहा।

हसूं शिखायै वषट्। हसिं कवचाय हुं।

हेसौं नेत्रत्रयाय वौषट्। हसः अस्त्राय फट्।

एवं कराङ्गन्यासं कृत्वा उपचारैः सम्पूज्य।

॥ अथ कवचं ॥

ॐ नमः प्रकाशानन्दनाथश्च शिखायां पातु मे सदा।

परशिवानन्दनाथश्च शिरो मे रक्षयेत् सदा ॥ १॥

परशक्तिदिव्यानन्दनाथो भाले च रक्षतु ।
कामेश्वरानन्दनाथो मुखं रक्षतु सर्वधृक् ॥ २॥

दिव्यौघो मस्तकं देवि ! पातु सर्वं शिरः सदा ।
कण्ठादिनाभिपर्य्यन्तं सिद्धौघा गुरवः प्रिये ! ॥ ३॥

भोगानन्दनाथगुरुः पातु दक्षिणबाहुकम् ।
समयानन्दनाथश्च सन्ततं हृदयेंऽवतु ॥ ४॥

सहजानन्दनाथश्च कटिं नाभिञ्च रक्षतु ।
एषु स्थानेषु सिद्धौघा रक्षन्तु गुरवः सदा ॥ ५॥

अधरे मानवौघाश्च गुरवः कुलनायिके ! ।
गगनानन्दनाथश्च गुल्फयोः पातु सर्वदा ॥ ६॥

नीलौघानन्दनाथश्च रक्षयेत्पादपृष्ठतः ।
स्वात्मानन्दनाथगुरुः पादाङ्गुलीश्च रक्षतु ॥ ७॥

कन्दोलानन्दनाथश्च रक्षेत्पादतले सदा ।
इत्येवं मानवौघाश्च न्यसेन्नाभ्यादिपादयोः ॥ ८॥

गुरुर्मे रक्षयेदुर्व्यां सलिले परमो गुरुः ।

परापरगुरुर्वह्नौ रक्षयेत् शिववल्लभे ! ॥ ९॥

परमेष्ठी गुरुश्चैव रक्षयेद्वायुमण्डले ।

शिवादिगुरवः साक्षादाकाशे रक्षयेत् सदा ॥ १०॥

इन्द्रो गुरुः पातु पूर्वे आग्नेय्यां गुरुरग्नयः ।

दक्षे यमो गुरुः पातु नैरृत्यां निरृतिर्गुरुः ॥ ११॥

वरुणो गुरुः पश्चिमे च वायव्यां मारुतो गुरुः ।

उत्तरे धनदः पातु ऐशान्यामीश्वरो गुरुः ॥ १२॥

ऊर्ध्वं पातु गुरुर्ब्रह्मा अनन्तो गुरुरप्यधः ।

एवं दश दिशः पान्तु इन्द्राद्या गुरवः क्रमात् ॥ १३॥

शिरसः पादपर्य्यन्तं पान्तु दिव्यौघसिद्धयः ।

मानवौघाश्च गुरवो व्यापकं पान्तु सर्वदा ॥ १४॥

सर्वत्र गुरुरूपेण संरक्षेत् साधकोत्तमम् ।

आत्मानं गुरुरूपं च ध्यायेन्मन्त्रं सदा बुधः ॥ १५॥

इत्येवं गुरुकवचं ब्रह्मलोकेऽपि दुर्लभम् ।

तव प्रीत्या मयाख्यातं न कस्य कथितं प्रिये ! ॥ १६॥

पूजाकाले पठेद् यस्तु जपकाले विशेषतः ।

त्रैलोक्यदुर्लभं देवि ! भुक्तिमुक्तिफलप्रदम् ॥ १७॥

सर्वमन्त्रफलं तस्य सर्वयन्त्रफलं तथा ।

सर्वतीर्थफलं देवि ! यः पठेत् कवचं गुरोः ॥ १८॥

अष्टगन्धेन भूर्जे च लिख्यते चक्रसंयुतम् ।

कवचं गुरुपङ्क्तेस्तु भक्त्या च शुभवासरे ॥ १९॥

पूजयेद्धूपदीपाद्यैः सुधाभिः सितसंयुतैः ।

तर्पयेद्गुरुमन्त्रेण साधकः शुद्धचेतसा ॥ २०॥

धारयेत् कवचं देवि ! इह भूतभयापहम् ।

पठेन्मन्त्री त्रिकालं हि स मुक्तो भवबन्धनात् ।

एवं कवचं परात्परं दिव्यौघसिद्धौघकालवान् ॥ २१॥

॥ इति पुरश्चरणरसोल्लासे द्वितीयप्रश्ने

दशमपटले गुरुकवचान्तरं समाप्तम् ॥

http://muktalib5.org

Proofread byDPD

Please send corrections to sanskrit@cheerful.com

Last updated तoday

http://sanskritdocuments.org

Guru Kavachantaram Lyrics in Devanagari PDF
% File name : gurukavachAntaram.itx
% Category : kavacha
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://muktalib5.org
% Proofread by : http://muktalib5.org, DPD
% Latest update : August 26, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website